कक्षा-**IX**

सङ्कलनात्मकं मूल्याङ्कनम् (प्रथमसत्रम्)

विषयः - संस्कृतम् सम्प्रेषणात्मकम्

निर्धारितसमयः - होरात्रयम् पूर्णाङ्काः - **90**

*निर्देशाः -* ***(1)*** *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्डः (क) अपठित-अवबोधनम्* - ***10*** *अङ्काः*

*खण्डः (ख) रचनात्मक-कार्यम्* - ***15*** *अङ्काः*

*खण्डः (ग) अनुप्रयुक्त-व्याकरणम्* - ***30*** *अङ्काः*

*खण्डः (घ) पठित-अवबोधनम्* - ***35*** *अङ्काः*

***(2)*** *सर्वे प्रश्नाः अनिवार्याः।*

***(3)*** *प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।*

***(4)*** *प्रश्नसंख्या अवश्यं लेखनीया।*

***(5)*** *उत्तराणि संस्कृतेन एव लेखनीयानि।*

## खण्डः (क) अपठित-अवबोधनम्) **10** अङ्काः

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत - (10)

संसारे मानवः मनुष्यः वा ईश्वरस्य सर्वश्रेष्ठा कृतिः अस्ति। संसारस्य समाजस्य च समस्तः विकासः मनुष्यस्य अधीनं वर्तते। मानवः सर्वेभ्यो गुरुतमः, उच्चतमः विशिष्टतमः च भवति। मनुष्यस्य बुद्धिः एव आकाशे ग्रहाणां यात्रा-योजनां निर्माति, सैव सागरस्य भूमेः च अपि सर्वस्वं ज्ञातुं प्रयत्नं करोति। किन्तु यदा मनुष्यः मानवतां विहाय यत्किमपि कर्म करोति अप्रियं च आचरति, तदैव सः एव मनुष्यः सर्वेभ्यः अपि लघुतमः भवति। कदाचित् मनुष्यः भेदभावनया परस्परं कलहम् अपि करोति। तस्य तथा व्यवहारः चिन्तां जनयति - अहो! कथं सर्वेभ्यः अपि वरिष्ठः श्रेष्ठः च मानवः स्वेन एव व्यवहारेण लघुताम् लभते न इदं शोभनम्।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) मनुष्यः भेदभावनया परस्परं किम् करोति?

(ii) संसारस्य समस्तः विकासः कस्य अधीनं वर्तते?

(II) पूर्णवाक्येन उत्तरत - (1x2=2)

(i) मनुष्यः कदा सर्वेभ्यः लघुतमः भवति?

(ii) मनुष्यस्य बुद्धिः किं ज्ञातुं प्रयत्नं करोति?

(III) यथानिर्देशम् उत्तरत - (1x4=4)

(i) 'कृतिः' पदस्य किम् विशेषणपदम् प्रयुक्तम्?

(अ) बुद्धिः (ब) सर्वश्रेष्ठा

(स) वरिष्ठः (द) मानवतां

(ii) गद्यांशे 'लभते' क्रियायाः कर्तृपदम् किम्?

(अ) सर्वेभ्यः (ब) इदं

(स) व्यवहारेण (द) मानवः

(iii) 'तस्य तथा व्यवहारः चिन्तां जनयति' अत्र 'तस्य' अयं शब्दः कस्मै प्रयुक्तः?

(अ) व्यवहाराय (ब) मनुष्याय

(स) कलहाय (द) विहाय

(iv) 'लघुतमः' इति शब्दस्य विलोमपदं किम्?

(अ) गुरुतमः (ब) विशिष्टतमः

(स) श्रेष्ठः (द) उच्चतमः

(IV) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। (2)

## खण्डः (ख) रचनात्मक-कार्यम् 15 अङ्काः

प्र2. भवत्याः नाम रमा। भवत्याः विद्यालये वनमहोत्सवः मानितः। तस्य वर्णयन् स्वमित्रं लतां प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः उचितपदैः पूरयित्वा पुनः लिखत - (½x10=5)

मञ्जूषा
हरीतिमा, आसन्, छात्रावासतः, आरोपितवन्तः, प्रशंसा, लते, मार्गम्, रमा, आरोपणे, पादपैः

(1)__________

दिनाङ्कः __________

प्रिये (2)__________!

सस्नेहं नमस्ते।


ह्यः एव मम विद्यालये वनमहोत्सवः मानितः। सर्वे छात्राः उत्साहिताः (3)__________। छात्राः स्व-स्वाध्यापकैः सह पादपानाम् (4)__________ व्यस्ताः आसन्। मम विद्यालयस्य परिसरः तु (5)__________ युक्तः अभवत्। एकादश-द्वादश कक्षायाः छात्राः तु विद्यालयात् बहिः गत्वा (6)__________ उभयतः पादपान् (7)__________ सर्वैः अस्माकं विद्यालयस्य छात्राणां प्रयासस्य (8)__________ कृता। यदि सर्वे विद्यालयाः एवं जागरुकाः भवेयुः तदा सर्वत्र एव (9)__________ भविष्यति। पितृभ्याम् नमः।

भवदीया अभिन्ना सखी

(10)__________

प्र3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत - (2x5=10)

मञ्जूषा
विद्यालयस्य, प्रधानाचार्यः, अध्यापिका, छात्राः, प्रार्थना, एकः बालः, ध्वनिविस्तारकयन्त्रस्य, कुर्वन्ति, समीपम्, प्रार्थनासभायाः, भित्तौ, चित्राणि, पंक्तिबद्धाः



अथवा

मञ्जूषायाः प्रदत्तशब्दानां सहायतया 'पर्वतीयस्थलम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत - (2x5=10)

| मञ्जूषा |
|---|
| ग्रीष्मावकाशे, पर्वतीयस्थलम्, जनाः, स्वास्थ्यलाभाय, आगच्छन्ति, स्वच्छं, वायुः, सूर्यः, वृक्षाः, पुष्पाणि, पर्यटनाय, शीतलवायुः, मनोरञ्जनम्, मित्रैः सह |

## खण्डः (ग) अनुप्रयुक्त-व्याकरणम्

30 अङ्काः

प्र4. अधोलिखित-प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत - (1x4=4)

(I) 'रक्तेन' इति पदे मूर्धन्यः वर्णः अस्ति?

(अ) त् (ब) र्

(स) ए (द) क्

(II) 'ख्' इति वर्णस्य उच्चारणस्थानं किम् अस्ति?

(अ) कण्ठः (ब) मूर्धा

(स) तालुः (द) दन्ताः

(III) उचितं वर्णं चित्वा वर्णवियोजने रिक्तस्थानपूर्तिं कुरुत -

पर्णम् = प् + अ + ________ + ण् + अ + म्

(अ) र् (ब) ऋ

(स) ञ् (द) ओ

(IV) उचितं वर्णसंयोजनम् कुरुत -

स् + व् + अ + स् + त् + इ = ________

(अ) स्वास्ती (ब) स्वास्ति

(स) स्वस्ति (द) सावस्ति

प्र5. अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x5=5)

(I) सदा + एव परिश्रमी भव।

(अ) सदेव (ब) सदैव

(स) सदोव (द) सदीव

(II) पितरम् दृष्ट्वा बालकः उल्लसितः जातः।

(अ) उद् + लसितः (ब) उत् + लसितः

(स) उल् + लसितः (द) उल्ल + सितः

(III) ते नीरोगाः आसन्।

(अ) नीर् + रोगाः (ब) निर् + उरगाः

(स) नीर् + उगाः (द) निर् + रोगाः

(IV) अल्पाहारी गृहत्यागी च स्यात्।

(अ) अल्प + आहारी (ब) अल्पा + हारी

(स) अल्प + हारी (द) अल्पाह + आरी

(V) एषु कः + चौरः अस्ति?

(अ) कस्चौरः (ब) कोऽचौरः

(स) कश्चौरः (द) कच्चौरः

(1x3=3)

प्र6. (क) उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत -

(I) कक्षायां दश ________ एव सन्ति।

(अ) छात्रः (ब) छात्रौ

(स) छात्राः (द) बालकेन

(II) ________ सुगन्धः सर्वत्र प्रसरति।

(अ) पुष्पाणाम् (ब) पुष्पेषु

(स) पुष्पाणि (द) पुष्पाय

(III) अरुणाचले अनेकाः ________ प्रवहन्ति।

(अ) नदी (ब) नद्यः

(स) नद्यौ (द) नदीम्

(1x2=2)

(ख) कोष्ठके प्रदत्तयोः शब्दयोः उचितां विभक्तिं प्रयुज्य रिक्तस्थानं पूरयत -

(i) ________ सह पुत्रः विद्यालयं गच्छति। (पितृ)

(ii) ________ वीराः स्मः। (अस्मद्)

(1x3=3)

प्र7. (क) उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत -

(I) रामः श्वः पटनानगरम् ________।

(अ) गमिष्यति (ब) गमिष्यथः

(स) गमिष्यसि (द) गमिष्यथ

(II) तेषां नराणां कानि नामानि ________?

(अ) असि (ब) अस्ति

(स) सन्ति (द) अस्मि

(III) वीरः शौर्येण मानम् ________।

(अ) लभते (ब) लभन्ते

(स) लभेते (द) लभसे

(1x2=2)

(ख) कोष्ठके प्रदत्तयोः धात्वोः उचितरूपे प्रयुज्य रिक्तस्थानं पूरयत -

(i) शिष्याः गुरून् ________। (नम् - लृट् लकारे)

(ii) भक्तः मुनिम् ________। (सेव् - लट् लकारे)

(1x3=3)

प्र8. (क) प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत -

(I) रजतः ________ निपुणः अस्ति।

(अ) चित्रकलायाम् (ब) चित्रकलाम्

(स) चित्रकलया (द) चित्रकला

(II) अस्माकं __________ पुरतः एका नदी वहति।

(अ) ग्रामस्य (ब) ग्रामात्

(स) ग्रामाय (द) ग्रामम्

(III) __________ नमः।

(अ) कविम् (ब) कवेः

(स) कवये (द) कविः

(ख) कोष्ठके प्रदत्तशब्दयोः उचितविभक्तिप्रयोगेन वाक्यद्वयम् पूरयत - (1x2=2)

(i) __________ बहिः कूपः अपि अस्ति। (मन्दिर)

(ii) __________ उभयतः वृक्षाः शोभन्ते। (नदी)

प्र9. (क) प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा रिक्तस्थानानि पूरयत - (1x4=4)

(I) पुस्तकानि आ + दा + ल्यप् ऋषभः विद्यालयमगच्छत्।

(अ) आदाय (ब) आदाल्य

(स) आदाल्प् (द) आदाय्

(II) जलं पा (पिब्) + क्त्वा काकः प्रसन्नोऽभवत्।

(अ) पात्वा (ब) पाक्त्वा

(स) पिबित्वा (द) पीत्वा

(III) रामः ईश्वरं __________ प्रातः उत्तिष्ठति।

(अ) स्मर् + तुमुन् (ब) स्मृ + तुमुन्

(स) स्म + तुमुन् (द) स्म्र + तुमुन्

(IV) भक्तः शिवं __________ सुखं प्राप्नोति।

(अ) सम् + पूज्य + यत् (अ) सम् + पूज् + तुमुन्

(स) सम् + पूज्य + क्त्वा (द) सम् + पूज् + ल्यप्

(ख) अधोलिखितवाक्ययोः रेखांकितपदयोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत - (1x2=2)

(i) गीतं __________ शिशुः प्रसीदति। (श्रु + क्त्वा)

(ii) मालाकारः पुष्पाणि चेतुम् उद्यानं गच्छति। (______ + तुमुन्)

## खण्डः (घ) पठित-अवबोधनम् 35 अङ्काः

प्र10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

न अनृतं ब्रूयात्। न अतिब्रूयात्। न अन्यस्वम् आहरेत्। न वैरं रोचयेत्। न कुर्यात् पापम्। न पापेऽपि पापी स्यात्। न अन्यदोषान् ब्रूयात्। न अन्यरहस्यम् आगमयेत्। अधार्मिकैः न दुष्टैः सह आसीत। न नासिकां कुष्णीयात्। न दन्तान् विघट्टयेत्। न भूमिं विलिखेत्। न नखान् वादयेत्। न छिन्द्यात् तृणम्। न द्रुमम् आरोहेत्। न जलोग्रवेगम् अवगाहेत्।

(I) एकपदेन उत्तरत - (½x2=1)

(i) कान् न विघट्टयेत्?

(ii) किम् न छिन्द्यात्?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

कैः कैः सह न आसीत?

(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत - (1x2=2)

(i) 'वृक्षम्' अस्य किं पर्यायपदं अत्र प्रयुक्तम्?

(अ) नखान् (ब) तृणम्

(स) द्रुमम् (द) वेगम्

(ii) 'न पापेऽपि पापी स्यात्' अस्मिन् वाक्ये कर्तृपद किम् अस्ति?

(अ) पापे (ब) पापी

(स) अपि (द) त्वम्

प्र11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

काष्ठादग्निर्जायते मथ्यमानाद्<br>
भूमिस्तोयं खन्यमाना ददाति।<br>
सोत्साहानां नास्त्यसाध्यं नराणां<br>
मार्गारब्धाः सर्वयत्नाः फलन्ति॥

(I) एकपदेन उत्तरत - (½x2=1)

(i) कीदृशाः यत्नाः फलन्ति?

(ii) मथ्यमानात् काष्ठात् कः जायते?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

केषाम् कृते असाध्यम् न अस्ति?

(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - (1x2=2)

(i) 'जल' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्।

(अ) जायते (ब) तोयम्

(स) काष्ठात् (द) सोत्साहानां

(ii) 'ददाति' क्रियापदस्य कर्तृपदम् किम् अस्ति?

(अ) अग्निः (ब) सर्वयत्नाः

(स) तोयम् (द) भूमिः

प्र12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

रामः - वत्स लक्ष्मण! किमेवं भरतः प्राप्तः?<br>
लक्ष्मणः - आर्य! अथ किम्?<br>
सीता - आर्यपुत्र! किं भरतः आगतः?<br>
रामः - मैथिलि! अथ किम्?<br>
लक्ष्मणः - आर्य! किं प्रविशतु कुमारः?<br>
रामः - अथवा तिष्ठ त्वम्।<br>
सीता - यत् आर्यपुत्र आज्ञापयति। (उत्थाय, परिक्रम्य, भरतम् अवलोक्य)<br>
भरतः - अये, इयमत्र भवती जनकराजपुत्री? आर्ये, अभिवादये, भरतोऽहमस्मि।<br>
सीता - (आत्मगतम्) नहि रूपमेव। स्वरयोगः अपि स एव (प्रकाशम्) वत्स! चिरंजीव।<br>
भरतः - अनुगृहीतोऽस्मि।

(I) एकपदेन उत्तरत - (½x2=1)

(i) 'किं भरतः आगतः' इति का कथयति?

(ii) कः अनुगृहीतः?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

रामः लक्ष्मणं किं पृच्छति?

(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - (1x2=2)

(i) 'सीते!' इति अर्थे किं पदं प्रयुक्तम्?

(अ) आर्यपुत्र! (ब) वत्स!

(स) आर्य! (द) मैथिलि!

(ii) 'भरतोऽहमस्मि' अत्र क्रियापदम् किम्?

(अ) भरतः (ब) आर्ये

(स) अहम् (द) अस्मि

प्र13. (क) अधोलिखितपंक्त्योः उचितं भावार्थम् चित्वा उत्तरपुस्तकायां लिखत - (1x2=2)

(I) क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।

(i) कालः विलम्बितस्य कार्यस्य आनन्दं नाशयति।

(ii) कार्यस्य आनन्दं स्वयमेव नश्यति।

(iii) कार्यस्य स्वादः न्यूनः भवति।

(iv) कार्यम् शनैः शनैः कुर्याम तदैव तत् फलति।

(II) न दुष्टयानानि आरोहेत्।

(i) दुष्टानाम् वाहनानि प्रयोगं कुर्यात्।

(ii) न दुष्टैः सह वाहनानि आरोहेत्।

(iii) दूषितानि स्थानानि न गच्छेत्।

(iv) विकृतानि वाहनानि न आरोहेत्।

(ख) अधोलिखितश्लोकस्य भावार्थं मञ्जूषायाः उचितपदानि चित्वा पूरयत - (½x4=2)

| मञ्जूषा |
|---|
| वरं, चन्द्रः, पुत्रः, शतानि |

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥

भावार्थः - गुणवान् (1)________ तु एकः एव (2)________ भवति। (3)________ अपि मूर्खपुत्राः वृथा एव भवन्ति। यथा एकाकी (4)________ तमः हन्तुम् शक्नोति परन्तु मन्दाः बहुसंख्यतारकाः न।

प्र14. अधोलिखित-श्लोकस्य अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत - (½x8=4)

(I) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्॥

अन्वयः - सद्भिः तु (1)________ अपि प्रोक्तं (2)________ अक्षरं (भवति)। असद्भिः (3)__________ अपि जले लिखितम् (4)________ भवति।

(II) यावद् भविष्यति भवन्नियमावसानम्।
तावद् भवेयमिह ते नृप! पादमूले ॥

अन्वयः - नृप! (1)__________ भवत्-नियम-अवसानम् (2)________, तावत् (3)__________ ते (4)________ भवेयम्।

प्र15. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(I) <u>पुत्राणाम्</u> आचारहीनतया राजा चिन्तितः भवति।

(II) <u>मनः</u> न अनुभ्रामयेत्।

(III) ततः भरतः <u>रथेन</u> प्रविशति।

(IV) <u>ब्राह्मणी</u> शिशोः रक्षार्थं ब्राह्मणं नियुज्य स्नातुं गता।

प्र16. अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत - (½x8=4)

(i) गृहम् आगत्य माधवः रक्तविलिप्तमुखं नकुलं पश्यति।

(ii) माधवः स्वपुत्ररक्षायां नकुलं व्यवस्थाप्य राज्ञः समीपं श्राद्धार्थं गच्छति।

(iii) 'बालकोऽनेन खादितः' इति अवधार्य ब्राह्मणः नकुलं व्यापादयति।

(iv) नकुलः बालकस्य समीपम् उपसर्पन् सर्पं पश्यति।

(v) सर्पं व्यापाद्य नकुलः रक्तविलिप्तमुखं भवति।

(vi) माधवः नाम विप्रः आसीत्।

(vii) विप्रः पश्चात्तापेन दुःखी भवति।

(viii) माधवस्य भार्या बालापत्यस्य रक्षार्थं पतिं नियुज्य स्नातुम् गच्छति।

प्र17. (I) प्रसंगानुसारं रेखांकितपदयोः उचितम् अर्थम् चित्वा लिखत - (1x2=2)

(i) अत्र तु <u>दैवम्</u> कारणमिति न उचितम्।

(अ) भाग्यम् (ब) देवता

(स) बृहस्पतिः (द) मितम्

(ii) न्यग्रोधफलम् <u>आहर</u>।

(अ) चोरय (ब) वीक्ष्य

(स) अधीत्य (द) आनय

(II) शब्दानाम् अर्थैः सह मेलनं कुरुत - (½x4=2)

| शब्दाः | अर्थाः |
|---|---|
| (i) पदम् | समीपम् |
| (ii) दयितः | धनस्य |
| (iii) वित्तस्य | प्रियः |
| (iv) सकाशम् | स्थानम् |